# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा- आचार्य-२** | **प्रश्नपत्रम् – ५** | **गुणाः – ७०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम्- ४ (चतुर्थम्)** | **समयः- ११:३० तः ०२:३०** |
| **दिनाङ्कः – ३१/०३/२०२०** | **सन्दर्भग्रन्थः – विदुरनीतिः (१ तः ८ अध्यायाः)** | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः १ एकस्य ससन्दर्भ व्याख्या कार्या।** ०५

१ धमार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते।।

२ यथा यथा हि पुरुषः कल्याणे कुरुते मनः।
तथा तथाऽस्य सर्वार्थाः सिद्धयन्ते नात्र संशयः।।

**प्रश्नः २ एकस्य निबन्धात्मकमुत्तरं लिखत। सविस्तृतं।** १०

१ केशिनी विरोचन संवादं यथाग्रन्थं लिखत।

२ विदुरनीतेः महत्त्वं प्रतिपादयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः ३ एकस्य सप्रसङ्गं भावार्थो लेख्यः।** ०५

१ यादृशैः सन्निविशते यादृशाश्चापसेवते।
तादृगिच्छेच्च भवितुं तादृग् भवति पूरुषः।।

२ अतिमानोतिवादश्च तथाऽत्यागो नराधिप।
क्रोधश्चात्मविधित्सा च मित्रद्रोहश्च तानि षट्।।

**प्रश्नः ४ एकस्य सारांशात्मकमुत्तरं लिखत।** १०

१ चतुर्थाध्यायस्य सारांशं लिखत।

२ पण्डितलक्षणानि समासतो लिखत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्नः ५ एकस्य ससन्दर्भ भावार्थो देयः।** ०५

१ न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति।।

२ धृतिः शमो दमः शौचम् कारूण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः।।

**प्रश्नः ६ एकस्य सविस्तृतमुत्तरं लिखत।** १०

१ विदुरनीत्युक्त राजधर्मान् वर्णयत।

२ धर्मशास्त्रनीतिशास्त्रयोर्भेदः कः? वर्णयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ एकस्य ससन्दर्भ विशेषार्थं लिखत।** ०५

१ कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते।
तदेवापहरत्येनं तस्मात् कल्याणमाचरेत्।

२ कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम्।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर।।

**प्रश्नः ८ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ "सांप्रसमाजे नीतिग्रन्थानां आवश्यकता" इति विषये लिखत ।

२ "सुखार्थिनः कुतो विद्या" इति विषयं वर्णयत।

**प्रश्नः ९ दशानां लघूत्तराणि लिखत।** १०

१ विदुरनीतो कति अध्यायाः सन्ति?

२ काष्ठेभ्यः कः न तृप्यति?

३ नदीभिः कः न तृप्यति?

४ प्राणिभिः कः न तृप्यति?

५ आशा कं हन्ति?

६ क्रोधः कं हन्ति?

७ कदर्यता कं हन्ति?

८ प्रथमाध्याये कति श्लोकाः सन्ति?

९ अष्टमाध्याये कति श्लोकाः सन्ति?

१० ज्ञानेन्द्रियाणि कति सन्ति?

११ पुरुषार्थाः कति सन्ति? के च ते?

१२ अकस्मात् के कुप्यन्ति?

१३ सन्तापात् किं नश्यति?

१४ राज्ञा कति दोषाः हातव्याः?

१५ कति प्रकारकाः जनाः धर्मं न जानन्ति?

**************************